सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥”
भर्त्तृविरहस्तु स्त्रीणां दोषाय भवति। यथा, मनौ। ९। १३।
“पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम्।
स्वप्नोऽन्यगेहे वासश्च नारीणां दूषणानि षट् ॥”)
विरहे वर्णनीयानि यथा। तापः। निश्वासः। चिन्ता। मौनम्। कृशाङ्गता। वत्सरतुल्यरात्रिदैर्घ्यम्। जागरणम्। शीतवे उष्णताज्ञानम्। इति कविकल्पलता ॥

विरहिणी, स्त्री, (विरहोऽस्या अस्तीति। विरह + इनि + स्त्रियां ङीप्।) विच्छेदविशिष्टा नारी। यथा,—
“रतिः पुंसो विरहिणी प्रियः स्त्रीविरही चिरम्।
द्वयोर्द्वयोश्च संप्राप्तौ किं बभूव द्वयोः सुखम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४६ अध्यायः ॥
भर्त्तृः। इति शब्दमाला ॥

विरहितः, त्रि, (वि + रह + क्तः।) त्यक्तः। विहीनः। यथा,—
“अभिभूतश्चावमतं त्यक्तस्तु स्यात् समुज्झितम्।
हीनं विरहितं धूतस्तुच्छश्चविधुते अपि ॥”
इति जटाधरः ॥
(यथा, साहित्यदर्पणे। १०।
“इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः
सुधाधाराधारश्चिरपरिणतं विम्बमधरः ॥
इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥”)

विरही, [न्] पुं, (विरहोऽस्यास्तीति। इनिः।) विरहविशिष्टः। वियोगी। यथा,—
“विहरति हरिरिह सरसवसन्ते।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ॥”
इति जयदेवः ॥

विरागः, पुं, (वि + रञ्ज + घञ्।) अननुरागः। रागशून्यः। यथा,—
“विषयेष्वतिसंरागो मानसो मल उच्यते।
तेष्वेव हि विरागो हि नैर्मल्यं समुदाहृतम् ॥”
इति प्रायश्चित्ततत्त्वम् ॥
(त्रि, विविधवर्णविशिष्टः। यथा, महाभारते। २। २९। २५।
“बलाद्गृहीत्वा माल्यानि मालाकारान्महाबलाः।
विरागवसनाः सर्व्वे स्रग्विणो रक्तकुण्डलाः ॥”
विगतो रागो विषयवासना यस्येत्यर्थे। वीतरागः। यथा, भागवते। ३। १५। ४७।
“यत्तेऽनुतापविदितैर्दृढभक्तियोगैः
रुद्ग्रन्थयो हृदि विदुर्म्मुनयो विरागाः ॥”)

विरागार्हः, त्रि, (विरागं अर्हतीति। अर्ह + अच्।) विरागयोग्यः। तत्पर्य्यायः। वैरङ्गिकः २। इति हेमचन्द्रः ॥

विराजः, पुं, (विशेषेण राजते इति। वि + राज + अच्।) विराट्। यथा,—
“इन्द्राग्नी वदनात्तुभ्यं पशवो मलसम्भवाः।
ओषध्यो रोमसम्भूता विराजस्त्वं नमोऽस्तु ते ॥”
इति वामने ८३ अध्यायः ॥

विराजमानः, त्रि, (वि + राज + शानच्।) दीप्तिविशिष्टः। यथा,—
“जटाकटाहसम्भ्रमद्भ्रमन्निलिम्पनिर्झरी
विलोलवीचिवल्लरीविराजमानमूर्द्धनि।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥”
इति काशीखण्डे रावणकृतशिवताण्डवस्तोत्रम् ॥

विराजितः, त्रि, (वि + राज + क्तः।) शोभितः। दीप्तः। यथा,—
“अतीव निर्म्मलं सारं सूर्य्यभासविनिन्दकम्।
परिष्कृतञ्च माणिक्यैर्हीरकैश्च विराजितम् ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १० अध्यायः ॥

विराट्, [ज्] पुं, (विशेषेण राजते इति। राज दीप्तौ + क्विप्।) क्षत्त्रियः। इत्यमरः ॥ स्थूलशरीरसमष्ट्युपहितचैतन्यम्। इति वेदान्तसारः ॥ * ॥ (ब्रह्मणो विराड्मूर्त्तिवर्णनं यथा, शङ्करविजये ६ प्रकरणे। “स्थूलमूर्त्तिर्विराट् चतुर्द्दशलोकात्मकः। तस्य ब्रह्माण्डकर्परपर्य्यन्तमाकाशः शिरः, चन्द्रसूर्य्यौ नेत्रे, प्रागादिदिशः श्रोत्रे, अन्तरीक्षलोको प्राणं, मेरुः पृष्ठवंशः, शिखरत्रयं भुजकण्ठाः, प्रत्यन्तपर्व्वताः पृष्ठपार्श्ववर्त्तीनि, उपपर्व्वताः शाल्मल्यादीनि, समुद्रा रक्तं, लता स्नायूनि, तृणवृक्षाः रोमाणि, भूमिः कुक्षिः, द्वीपा वलयः, भूरेखा रोमराजिः, भूमध्यप्रदेशो वस्तिः, शेषः शिश्नं, दिग्दन्तिपङ्क्तिर्नितम्बोरुभागः, अतलादिसप्तकं कटिपादान्तरालः, कूर्म्मः पादौ इति ॥” * ॥) महाविराडुत्पत्तिर्यथा,—
श्रीनारायण उवाच।
“अथ डिम्बो जले तिष्ठन् यावद्वै ब्रह्मणो वयः।
ततः स काले सहसा द्विधा भूतो बभूव ह ॥
तन्मध्ये शिशुरेकश्च शतकोटिरविप्रभः।
क्षणं रोरूयमाणश्च स्तनन्धः पीडितः क्षुधा ॥
पितृमातृपरित्यक्तो जलमध्ये निराश्रयः।
ब्रह्माण्डसंघनाथो यो ददर्शोर्द्ध्वमनाथवत् ॥
स्थूलात् स्थूलतमः सोऽपि नाम्ना देवो महाविराट्।
परमाणुर्यथा सूक्ष्मात् परः स्थूलात्तथाप्यसौ ॥
तेजसा षोड़शांशो यः कृष्णस्य परमात्मनः।
आधारोऽसंख्यविश्वानां महान् विष्णुश्च प्राकृतः ॥
प्रत्येकं लोमकूपेषु विश्वानि निखिलानि च।
तस्यापि तेषां संख्याञ्च कृष्णो वक्तुं न हि क्षमः ॥
संख्या चेद्रजसामस्ति विश्वानां न कदाचन।
ब्रह्मविष्णुशिवादीनां तथा संख्या न विद्यते ॥
प्रतिविश्वेषु सन्त्येवं ब्रह्मविष्णुशिवादयः।
पातालाद्ब्रह्मलोकान्तं ब्रह्माण्डं परिकीर्त्तितम् ॥
अत ऊर्द्ध्वञ्च वैकुण्ठो ब्रह्माण्डाद्बहिरेव च।
स च सत्यस्वरूपश्च शश्वन्नारायणो यथा ॥
अत ऊर्द्ध्वञ्च गोलोकः पञ्चाशत्कोटियोजनात्।
नित्यं सत्यस्वरूपश्च यथा कृष्णस्तथाप्ययम् ॥
सप्तद्वीपमिता पृथ्वी सप्तसागरसंयुता।
ऊनपञ्चाशदुपद्वीपासंख्यशैलसमन्विता ॥
ऊर्द्ध्वं स्वर्गाः सप्त लोका ब्रह्मलोकसमन्विताः।
पातालानि च सप्ताधश्चैवं ब्रह्माण्डमेव च ॥
ऊर्द्ध्वं धराया भूर्लोको भुवर्लोकस्ततः परः।
ततः परश्च स्वर्लोको जनो लोकस्ततः परः ॥
ततः परस्तपोलोकः सत्यलोकस्ततः परः।
ततः परो ब्रह्मलोकस्तप्तकाञ्चननिर्म्मितः ॥
एवं सर्व्वं कृत्रिमञ्च धराभ्यन्तरमेव च।
तद्विनाशे विनाशश्च सर्व्वेषामेव नारद ॥
जलबुद्बुदवत् सर्व्वं विश्वसंघमनित्यकम्।
नित्यौ वैकुण्ठगोलोकौ सत्यौ शश्वदकृत्रिमौ ॥
प्रतिलोमकूपे ब्रह्माण्डं प्रत्येकमस्य निश्चितम्।
एषां संख्या न जानाति कृष्णोऽन्यस्यापि का कथा ॥
प्रत्येकं प्रतिब्रह्माण्डे ब्रह्मविष्णुशिवादयः।
तिस्रः कोट्यः सुराणाञ्च संख्याः सर्व्वत्र पुत्त्रक ॥
दिगीशाश्चैव दिक्पाला नक्षत्राणि ग्रहादयः।
भुवि वर्णाश्च चत्वारोऽप्यधो नागाश्चराचराः ॥
अथ काले च स विराट् ऊर्द्ध्वं दृष्ट्वा पुनः पुनः।
डिम्बान्तरञ्च शून्यञ्च न द्वितीयञ्च कञ्चन ॥
चिन्तामवाप क्षुद्युक्तो रुरोद च पुनः पुनः।
ज्ञानं प्राप्य तदा दध्यौ कृष्णं परमपूरुषम् ॥
ततो ददर्श तत्रैव ब्रह्मज्योतिः सनातनम्।
नवीनजलदश्यामं द्विभुजं पीतवाससम् ॥
सस्मितं मुरलीहस्तं भक्तानुग्रहकारकम्।
जहास बालकस्तुष्टो दृष्ट्वा जनकमीश्वरम् ॥
वरं तस्मै ददौ तुष्टो वरेशः समयोचितम्।
मत्समो ज्ञानयुक्तश्च क्षुत्पिपासादिवर्ज्जितः ॥
ब्रह्माण्डासंख्यनिलयो भव वत्स लयावधि।
निष्कामो निर्भयश्चैव सर्व्वेषां वरदो वरः ॥
जराम्त्युरोगशोकपीड़ादिवर्ज्जितो भव।
इत्युक्त्वा च दक्षकर्णे महामन्त्रं षड़क्षरम् ॥
त्रिःकृत्वश्च प्रजजाप वेदाङ्गमवरं परम्।
प्रणवादिचतुर्थ्यन्तं कृष्ण इत्यक्षरद्वयम् ॥
वह्निजायान्तमिष्टञ्च सर्व्वविघ्नहरं परम्।
मन्त्रं दत्त्वा तदाहारं कल्पयामास स प्रभुः ॥
श्रूयतां ब्रह्मन्! श्रुत्वा निबोध कथयामि ते।
प्रतिविश्वेषु यन्नैवेद्यं ददाति विष्णवे जनः ॥
तत्षोड़शांशं विषयिणो विष्णोः पञ्चदशास्य वै।
निर्गुणस्यात्मनश्चैव परिपूर्णतमस्य च ॥
नैवेद्येन च कृष्णस्य नहि किञ्चित् प्रयोजनम्।
यद्यद्ददाति नैवेद्यं यस्मै देवाय यो जनः ॥
स च खादति तत् सर्व्वं लक्ष्मीदृष्ट्या पुनर्भवेत्।
तञ्च मन्त्रं वरं दत्त्वा तमुवाच पुनर्व्विभुः ॥
वरमन्यं किमिष्टन्ते तन्मे ब्रूहि ददामि च।
कृष्णस्य वचनं श्रुत्वा तमुवाच महाविराट् ॥
वदन्तो बालकस्तत्र वचनं समयोचितम् ॥
श्रीमहाविराडुवाच।
वरं मे त्वत्पदाम्भोजे भक्तिर्भवतु निश्चला।
सन्ततं यावदायुर्मे क्षणं वा सुचिरं हि वा ॥